# दशमः पाठः

'सुभाषितम्' इत्यनेन पदेन तु भवन्तः सर्वे परिचिताः एव स्युः। सुभाषितम्, अमृतवचनं, नीतिवाक्यं, सूक्तिः इत्यादयः सर्वेऽपि पर्यायशब्दास्सन्ति। तद् वाक्यं (वाक्यांशोऽपि वा) सुभाषितम् इत्युच्यते यत् श्रुत्वा मनस्तोषः सुखानुभूतिश्च जायते, यत् अन्येषां मनः क्लेशाय न भवेत्, यस्य प्रयोगः अपरेषाम् अनादराय न स्यात्, यत् सत्यपूतं हितावहं च भवेत्, यत्र नैतिकता-बुद्धिमत्ता-विवेकशीलता च स्यात्। सुभाषितस्य लक्षणं क्वचिद् एवं कृतमस्ति-"**वचनं सारभूतं यत्-तत् सुभाषितमुच्यते।**" अस्माकं जीवने सुभाषितानां कियत् महत्त्वं वर्तते, इत्यस्मिन् विषयेऽपि कतिपयानि सुभाषितानि एवं मिलन्ति-

१. संसार-कटुवृक्षस्य द्वे फले अमृतोपमे।
सुभाषितरसास्वादः सङ्गतिः सुजने जने।।

२. सुभाषितरसास्वादः सज्जनैः सह संगतिः।
सेवा विवेकिभूपस्य दुःख-निर्मूलनं त्रयम्।।

३. सुभाषितेन गीतेन बालकानां च लीलया।
मनो न भिद्यते यस्य स वै मुक्तोऽथवा पशुः।।

४. अमेध्यादपि काञ्चनम् बालादपि सुभाषितम्।।

सुभाषित-प्रशंसात्मकानां एषां चतुर्णां पद्यानाम् अयमेव सारः यत् —

१. असारेऽस्मिन् संसारे सुभाषितरसास्वादनं खलु अमृतास्वादनसमम्।

२. सुभाषितास्वादनं दुःखनिवारणम्।

३. सुभाषितं हि मनसः द्रवीभावस्य कारणम्।

४. सुभाषितं तु बालकादपि लभ्यते चेत् स्वीकरणीयम्।

अतो हि पाठेऽस्मिन् भवतां रसास्वादनाय, ज्ञानार्जनाय, गुणार्जनाय च कानिचन प्रसिद्धानि ज्ञातमूलानि अज्ञातमूलानि च सुभाषितानि इतस्ततः समाकृष्य लिख्यन्ते। वाणी-माधुरी, सद्गुण-महिमा, पात्रापात्रविवेकः, खल-सज्जन-विवेकः, विद्यार्जन-धनार्जन-धर्मार्जन-प्रकारः, मैत्री, दानशीलता, अहिंसावृत्तिः, आततायिनं प्रति नीतिः, संघवृत्तिः — इत्येवं विविध-विषय-सम्बद्धानि सुभाषितानि अत्र चितानि।

# सुभाषित-रत्नानि

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढ़ैः पाषाण - खण्डेषु रत्नसंज्ञा विधीयते।। १ ।।

प्रियवाक्य - प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।। २ ।।

गुणैः गौरवमायाति नोच्चैः आसनमास्थितः।
प्रासादशिखरस्थोऽपि काको न गरुडायते।। ३ ।।

पात्रापात्र - विवेकोऽस्ति धेनुपन्नगयोः इव।
तृणात्संजायते क्षीरं क्षीरात्संजायते विषम्।। ४ ।।

यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।। ५ ।।

अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।। ६ ।।

धन - धान्य - प्रयोगेषु विद्यायाः संग्रहेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्।। ७ ।।

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय ।। ८ ।।

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति।। ९।।

शोकाराति - परित्राणं प्रीतिविस्त्रम्भभाजनम्।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्।। १० ।।

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।। ११ ।।

अनुकूले विधौ देयं यतः पूरयिता हरिः।
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति।। १२ ।।

अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते।। १३ ।।

आततायिनम् आयान्तं हन्यादेवाविचारयन्।
नाततायि-वधे दोषो हन्तुर्भवति कश्चन।। १४ ।।

गोपालसाङ्घिकः कृष्णः रामो वानरसाङ्घिकः।
सद्भिक्षुसाङ्घिको बुद्धः महात्मानो हि साङ्घिकाः।। १५ ।।

## अन्वयः

१. पृथिव्यां त्रीणि रत्नानि (सन्ति) - जलम् अन्नं सुभाषितम् (च)। मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

२. प्रियवाक्य-प्रदानेन सर्वे जन्तवः तुष्यन्ति। तस्मात् तदेव (प्रियवाक्यमेव) वक्तव्यम्। वचने का दरिद्रता?

३. (मनुष्यः) गुणैः गौरवम् आयाति, न (तु) उच्चैः आसनम् आस्थितः (जनः)। काकः प्रासाद-शिखरस्थः अपि (सन्) न गरुडायते।

४. पात्रापात्र-विवेकः धेनुपन्नगयोः इव अस्ति। तृणात् क्षीरं संजायते, क्षीरात् (च) विषं संजायते।

५. यथा नरः खनित्रेण खनन् वारि अधिगच्छति, तथा (एव) शुश्रूषुः गुरुगतां विद्याम् अधिगच्छति।

६. प्राज्ञः अजरामरवत् विद्याम् अर्थं च चिन्तयेत्, मृत्युना केशेषु गृहीतः इव (च) धर्मम् आचरेत्।

७. धनधान्य-प्रयोगेषु विद्यायाः संग्रहेषु च, आहारे व्यवहारे च त्यक्तलज्जः (जनः) सुखी-भवेत्।

८. खलस्य विद्या विवादाय, धनं मदाय, शक्तिः (च) परेषां परिपीडनाय (भवति)। (किन्तु) साधोः एतत् (सर्वं) विपरीतं-(विद्या) ज्ञानाय, (धनं) दानाय, (शक्तिः) रक्षणाय च (भवति)।

९. खलः सर्षपमात्राणि (अपि) परच्छिद्राणि पश्यति, (परन्तु) आत्मनः बिल्वमात्राणि (छिद्राणि अपि) पश्यन् अपि न पश्यति।

१०. शोकाराति-परित्राणं प्रीतिविस्रम्भभाजनं मित्रम् इति इदम् अक्षरद्वयं रत्नं केन सृष्टम्?

११. परोक्षे कार्य-हन्तारं प्रत्यक्षे प्रियवादिनं, तादृशं पयोमुखं विषकुम्भं मित्रं वर्जयेत्।

१२. विधौ अनुकूले (सति) देयं यतः पूरयिता हरिः (अस्ति); विधौ प्रतिकूले (सत्यपि) देयं यतः (सः हरिः) सर्वं हरिष्यति।

१३. अहिंसा परमः धर्मः (अस्ति), तथा अहिंसा परं तपः, (तथा च) अहिंसा परमं सत्यं (विद्यते) यतः धर्मः प्रवर्तते।

१४. आयान्तं आततायिनं अविचारयन् हन्यात् एव। आततायि-वधे हन्तुः कश्चन दोषः न भवति।

१५. कृष्णः गोपाल-साङ्घिकः, रामः वानर-साङ्घिकः, बुद्धः (च) सद्भिक्षु-साङ्घिकः (आसीत्)। हि महात्मानः साङ्घिकाः (भवन्ति)।

## शब्दार्थाः

**पृथिव्याम्** — वसुन्धरायाम्। **पाषाण-खण्डेषु** — प्रस्तर-खण्डेषु। **रत्नसंज्ञा विधीयते** — रत्नम् इति नाम प्रदीयते। **प्रियवाक्य-प्रदानेन** — मृदुवाक्यप्रयोगेण, मधुरभाषणेन। **सर्वे जन्तवः** — सर्वेऽपि प्राणिनः। **तुष्यन्ति** — सन्तोषं प्राप्नुवन्ति। **दरिद्रता** — कृपणता। **गौरवम्** — गुरुताम्। **आयाति** — प्राप्नोति। **प्रासादशिखरस्थः** — प्रासादस्य भवनस्य शिखरे शीर्षे स्थितः। **गरुडायते** — गरुडवत् आचरति। **पात्रापात्रविवेकः** — पात्रस्य अपात्रस्य च भेदः। **धेनुपन्नगयोः इव** — गोसर्पयोः तुल्यम् (गाय व सर्प के समान)। **तृणात् क्षीरम्** — घासात् दुग्धम्। **क्षीरात् विषम्** — दुग्धात् विषम्। **संजायते** — उत्पद्यते। **खनित्रेण** — खनन साधनेन (कुदाल से)। **वारि** — जलम्। **अधिगच्छति** — प्राप्नोति (प्राप्त कर लेता है)। **गुरुगताम्** — गुरौ विद्यमानाम् (गुरु में विद्यमान)। **शुश्रूषुः** — श्रोतुं ज्ञातुम् इच्छुकः,

जिज्ञासु:, सेवापरायण:। **प्राज्ञः** — विद्वान्, बुद्धिमान्। **अजरामरवत्** — अहम् अजर: अमर: च इति मत्वा (अजर व अमर के समान अर्थात् स्वयं को अजर-अमर मानकर) **अजरः** = जरारहित:, **अमरः** = मरणरहित:। **चिन्तयेत्** — विचारयेत्, प्राप्नुयात्। **मृत्युना** — यमराजेन (मृत्यु के द्वारा)। **केशेषु गृहीत इव** — मरणासन्न: इव (मृत्यु ने केश पकड़ रखे हैं, ऐसा मानकर)। **धर्मम् आचरेत्** — धर्माचरणं कुर्यात्। **त्यक्तलज्जः** — त्यक्ता लज्जा येन स: (लज्जारहित)। **परेषाम्** — अन्येषाम्। **परिपीडनाय** — दु:खं दातुम्। **सर्षपमात्राणि** — सर्षपसदृशानि, अतिलघूनि (सर्षप=सरसों)। **परच्छिद्राणि** — परेषां दोषान्। **आत्मनः** — स्वस्य। **बिल्वमात्राणि** — बिल्वसदृशानि (बिल्व=बील के फल के समान), स्थूलानि। **शोकाराति-परित्राणम्** — शोक: एव अराति: शत्रु:, तस्मात् परित्राणम् रक्षणम्। (शोकरूपी शत्रु से बचाने वाला)। **प्रीतिविस्रम्भ-भाजनम्** — प्रीते: प्रेम्ण: विस्रम्भस्य विश्वासस्य च भाजनं पात्रम् (प्रेम और विश्वास का पात्र)। **अक्षरद्वयम्** — मि+त्र इत्यक्षरद्वयात्मकम् ('मि' और 'त्र' इन दो अक्षरों वाला)। **रत्नम्** — मणि:। **सृष्टम्** — निर्मितम्। **परोक्षे** — अप्रत्यक्षम्, अनुपस्थितौ (पीठ पीछे)। **कार्यहन्तारम्** — कार्यविघातकम्, कार्यविनाशकम् (काम बिगाड़ने वाले को)। **प्रत्यक्षे** — सम्मुखे, पुरत: (प्रकट में, सामने)। **प्रियवादिनम्** — मधुरभाषिणम्। **पयोमुखम्** — पय: दुग्धं मुखे यस्य तत्, तादृशम् (जिसके मुखभाग पर यानी ऊपर-ऊपर दूध हो, ऐसे को)। **विषकुम्भम्** — विषपूरितं कलशम् (जहर-भरे घड़े को)। **वर्जयेत्** — त्यजेत्। **विधौ** — भाग्ये। **अनुकूले** — अभिमते, मनोवाञ्छिते सति (अनुकूल होने पर)। **देयम्** — दातव्यम् (देना चाहिये)। **प्रतिकूले** — विपरीते सति (विपरीत होने पर)। **यतः** — यस्मात् (क्योंकि)। **पूरयिता** — दाता (देने वाला)। **हरिः** — परमेश्वर:। **हरिष्यति** — अपहरिष्यति (छीन लेगा)। **अहिंसा** — प्राणिवधस्य अभाव:, मनसा-वाचा-कर्मणा च प्राणिनाम् अपीडनम्। **परमः** — चरम:, सर्वोच्च:। **तपः** — तपश्चर्या। **यतः** — यस्मात् (जिससे)। **प्रवर्तते** — प्रारभते (प्रवृत्त होता है, चलता है)। **आयान्तम्** — आगच्छन्तम् (आते हुए)। **आततायिनम्** — आतंकिनम् (आततायी को)। **अविचारयन्** — अविचार्य (बिना विचारे)। **हन्तुः** — घातकस्य (मारने वाले का)। **दोषः** — अपराध:। **गोपालसाङ्घिकः** — गोपालानां संघटनेन सम्बद्ध:। **वानरसाङ्घिकः** — वानराणां संघेन सम्बद्ध:। **सद्भिक्षुसाङ्घिकः** — सद्भिक्षूणां संघेन सम्बद्ध:। **महात्मानः** — महापुरुषा:। **साङ्घिकाः** — संघसम्बद्धा:, संघप्रिया:, संघनिष्ठा:, साहचर्यशीला:।

## अभ्यास-प्रश्नाः

**वस्तुनिष्ठ-प्रश्नाः**

१. पृथिव्यां त्रिषु रत्नेषु एतत् न गण्यते —

(अ) जलम् (आ) अन्नम्

(इ) धनम् (ई) सुभाषितम् ( )

२. 'पन्नग'-शब्दस्य अर्थोऽस्ति —

(अ) पत्रम् (आ) नगः पर्वतः वा

(इ) गरुडः (ई) सर्पः ( )

३. कस्य धनं मदाय भवति —

(अ) खलस्य (आ) सज्जनस्य

(इ) धनिकस्य (ई) सर्वस्व ( )

४. अहिंसा अस्ति —

(अ) परमो धर्मः (आ) परं तपः

(इ) परमं सत्यम् (ई) उपर्युक्तं सर्वमपि ( )

५. 'खलः परच्छिद्राणि पश्यति' इत्यत्र 'छिद्रम्' इत्यस्य अर्थोऽस्ति —

(अ) विवरम् (आ) दोषः

(इ) गुणः (ई) बिलम् ( )

६. पुरतः यदि कश्चित् आततायी आयाति तर्हि सः —

(अ) बहिष्करणीयः, उत्सारणीयः (आ) ससम्भ्रमम् अभिनन्दनीयः

(इ) सत्वरं हन्तव्यः (ई) सर्वथा उपेक्षणीयः ( )

७. प्रीतिविस्रम्भभाजनम् कः भवति —

(अ) मित्रम् (आ) अमित्रम्

(इ) तटस्थः (ई) एते सर्वेऽपि ( )

८. दानं करणीयम् —

(अ) भाग्ये अनुकूले सति (आ) भाग्ये प्रतिकूले सति

(इ) सदैव (ई) कदापि नैव ( )

९. अधोलिखितेषु असत्यं कथनमस्ति —

(अ) शुश्रूषुः विद्याम् अधिगच्छति (आ) साधोः विद्या विवादाय भवति

(इ) आततायि-वधे दोषः न भवति (ई) महापुरुषाः सङ्गशीलाः भवन्ति ( )

**लघूत्तरात्मक-प्रश्नाः**

१. अधोलिखित-प्रश्नानाम् उत्तराणि दीयन्ताम् —

(क) 'सुभाषितम्' इति पदस्य कोऽर्थः ?

(ख) पृथिव्यां कियन्ति रत्नानि ? कानि च तानि ?

(ग) मूढैः कुत्र रत्नसंज्ञा विधीयते ?

(घ) पात्रापात्रविवेकः केन तुल्यं भवति ?

(ङ) अजरामरवत् किं चिन्तयेत् प्राज्ञः ?

(च) कुत्र लज्जा त्यक्तव्या सुखार्थिना ?

(छ) 'मित्रम्' इति पदं द्व्यक्षरं वा सार्द्धद्व्यक्षरं वा?

(ज) धनस्य पूरयिता, हर्त्ता च कोऽस्ति?

२. 'क'-खण्डं 'ख'-खण्डेन सह यथोचितं योजयतु —

| क | ख |
|---|---|
| १. खलः | खनित्रम् |
| २. पात्रम् | शोकाराति-परित्राणम् |
| ३. अपात्रम् | छिद्रान्वेषणम् |
| ४. खननम् | वानर-साङ्घिकः |
| ५. मित्रम् | धेनुः |
| ६. रामः | पन्नगः |
| ७. विद्या | दानाय मदाय च |
| ८. शक्तिः | कृष्णः |
| ९. धनम् | ज्ञानाय विवादाय च |
| १०. गोपालसाङ्घिकः | रक्षणाय पीडनाय च |

३. अधोलिखित-पदानां पर्यायपदानि पाठाद् आकृष्य लिखन्तु —

| | |
|---|---|
| १. पानीयम् | जलम्, वारि |
| २. दुग्धम् | ............... |
| ३. गौः | ............... |
| ४. सर्पः | ............... |
| ५. दुर्जनः | ............... |
| ६. धनम् | ............... |
| ७. शत्रुः | ............... |
| ८. भाग्यम् | ............... |
| ९. वासुदेवः | ............... |
| १०. सुहृद् | ............... |

४. निम्नलिखित-पदानां विलोमपदानि पाठाद् चित्वा लिखन्तु —

| | |
|---|---|
| १. दुर्भाषितम् | सुभाषितम् |
| २. सम्पन्नता | ............... |
| ३. सज्जनः | ............... |
| ४. नीचैः | ............... |
| ५. दुःखी | ............... |
| ६. प्रत्यक्षम् | ............... |

७. अनुकूलः ...............
८. हिंसा ...............
९. गुणः ...............
१०. अदेयम् ...............

५. स्थूलाक्षरपदमाश्रित्य (उदाहरणम् अनुसृत्य च) संस्कृतेन प्रश्नवाक्य-निर्माणं क्रियताम् —

१. **सर्वे जन्तवः** तुष्यन्ति। के तुष्यन्ति?
२. **काको** न गरुडायते। ...............................
३. **खलस्य** विद्या विवादाय भवति। ...............................
४. साधोः विद्या **ज्ञानाय** भवति। ...............................
५. वर्जयेत् **तादृशं** मित्रम्। ...............................
६. **आततायिनं** हन्यात्। ...............................
७. **विधौ अनुकूले** देयम्। ...............................

६. अधोलिखित-पदानि आधृत्य (उदाहरणं च अनुसृत्य) संस्कृतेन वाक्य-निर्माणं क्रियताम् —

१. दरिद्रता दरिद्रता सदा दुःखदायिनी भवति।
२. त्रीणि .........................................
३. यथा .........................................
४. इव .........................................
५. सुखी .........................................
६. कश्चन .........................................
७. धर्मः .........................................
८. रामः .........................................

**निबन्धात्मक-प्रश्नाः**

१. 'पृथिव्यां त्रीणि रत्नानि...... संज्ञा विधीयते'-अस्य सुभाषितस्य हिन्द्यर्थः लिख्यताम्।
२. 'विद्या विवादाय...... रक्षणाय।' — अस्य श्लोकस्य संस्कृत-व्याख्या क्रियताम्।
३. अस्मिन् पाठे सन्मित्रस्य कुमित्रस्य च विषये किं प्रतिपादितम् अस्ति? लिख्यताम्।

## उत्तर-माला

**वस्तुनिष्ठ-प्रश्नाः**

१. (इ) २. (ई) ३. (अ) ४. (ई) ५. (आ) ६. (इ) ७. (अ) ८. (इ) ९. (आ)

**परियोजनात्मकं कार्यम्**

१. अस्य पाठस्य सर्वाण्यपि सुभाषितानि कण्ठस्थीकृत्य तेषां शुद्धतया लेखनस्य, सस्वरं प्रस्तुतीकरणस्य च स्पर्धा कक्षायां सहपाठिभिः साकम् आयोजनीया।

**व्याकरण-प्रश्नाः**

१. सन्धिविच्छेदं/सन्धिं कुर्वन्तु —

| | |
|---|---|
| १. पात्रापात्रम् | ............... + ............... |
| २. वार्यधिगच्छति | ............... + ............... |
| ३. अजरामरवत् | ............... + ............... |
| ४. परच्छिद्राणि | ............... + ............... |
| ५. पश्यन्+अपि | .................................... |
| ६. शोकारातिः | ............... + ............... |
| ७. धर्मस्तथाऽहिंसा | ........... + ............+........... |
| ८. हन्यादेवाविचारयन् | ........... + ............+........... |

२. अधस्तन पदेषु प्रकृति-प्रत्यय-विभागं कुर्वन्तु —

| **पदम्** | **उपसर्गः + धातु + प्रत्ययः** |
|---|---|
| १. वक्तव्यम् | .................................. |
| २. रक्षणम् | .................................. |
| ३. त्यक्तम् | .................................. |
| ४. पश्यन् | .................................. |
| ५. परित्राणम् | .................................. |
| ६. सृष्टम् | .................................. |
| ७. हन्ता | .................................. |

३. समासः/समास-विग्रहः करणीयः —

| | |
|---|---|
| १. धेनुः च पन्नगः च | .................................. |
| २. पाषाणानां खण्डाः | .................................. |
| ३. त्यक्तलज्जः | .................................. |
| ४. परच्छिद्राणि | .................................. |
| ५. कार्यहन्ता | .................................. |
| ६. आततायिनां वधः | .................................. |